लक्षणम् २ आदानम् ३ रोगहेतुः ४ । इति राजनिर्घण्टः ॥ * ॥

"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥"
इति माधवकरः ॥

("सेति कर्त्तव्यताको रोगोत्पादकहेतुर्निदानम् ।"
इति रुग्विनिश्चयव्याख्याने विजयेनोक्तम् ॥
"इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम् । तत्त्रिविधं असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेत्यतस्त्रिविधविकल्पा व्याधयः प्रादुर्भवन्त्याग्नेयसौम्यवायव्याः ।" इति निदानस्थाने प्रथमेऽध्याये चरकेणोक्तम् ॥ पैलमुनिकृतचिकित्साग्रन्थविशेषः । यथा, ब्रह्मवैवर्त्ते । १ । १६ । २१ ।
"पैलो निदानं करयस्तन्त्रं सर्व्वधरं परम् ।
द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः ॥")

निदिग्धं, त्रि, (निदिह्यते स्मेति । दिह उपचये + क्तः ।) लेपादिना वर्द्धितम् । तत्पर्य्यायः । उपचितम् २ । इत्यमरः । ३ । १ । ८६ ॥

निदिग्धा, स्त्री, (निदिग्ध + टाप् ।) एला । इति शब्दचन्द्रिका ॥ (विवृतिरस्या एलाशब्दे ज्ञातव्या ॥)

निदिग्धिका, स्त्री, (निदिग्धा + स्वार्थे संज्ञायां वा कन् । कापि अत इत्वम् ।) एला । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते । ३ । १७ ।
"कपित्थबृहतीबिल्वपटोलेषु निदिग्धिकाः ॥")
कण्टकारिका । इत्यमरः । २ । ४ । ६३ ॥
(अस्याः पर्य्यायो यथा,—
"अनाक्रान्ता स्पृही व्याघ्री भण्डाकी च निदिग्धिका ।
सिंही धामनिका क्षुद्रा बृहती कण्टकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

निदिध्यासनं, क्ली, (पुनः पुनरतिशयेन वा निध्यायतीति । नि + ध्यै + सन् । ततो भावे ल्युट् ।) पुनःपुनःस्मरणम् ॥ अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धेः स्वजातीयप्रवाहः । इति वेदान्तसारः ॥

निदेशः, पुं, (नि + दिश + घञ् ।) आज्ञा । इत्यमरः । २ । ८ । २५ ॥ (यथा, देवीभागवते । २ । १० । ४६ ।
"प्रत्युत्थस्तान् द्विजान् मत्वा निदेशं भूपतेर्यथा॥")
कथनम् । उपान्तम् । इति मेदिनी । शे, २३ ॥
(यथा, मनुः । २ । १९७ ।
"पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥")
भाजनम् । इति धरणिः ॥

निदेशिनी, स्त्री, (निदिशतीति । नि + दिश + णिनि ङीप् ।) दिक् । इति राजनिर्घण्टः ॥

निदेष्टा, [ऋ] त्रि, (निदिशतीति । नि + दिश + तृच् ।) निदेशकर्त्ता । निदिशति इति व्युत्पत्त्या तृणा निष्पन्नः । इति मुग्धबोधमतम् ॥

निद्रा, स्त्री, (निन्द्यते इति । निदि कुत्सायाम् + "निन्देर्नलोपश्च ।" उणां । २ । १७ । इति रक् नलोपश्च ।) मेध्यामनःसंयोगः । इति जगदीशः ॥ सुषुप्त्यवस्थाखन्यावस्था । इति चण्डीटीकायां नागभट्टः ॥ घुम इति भाषा ॥ तत्पर्य्यायः । शयनम् २ स्वापः३ स्वप्नः४ संवेशः५ । इत्यमरः । २ । ७ । ३६ ॥ सुप्तिः ६ स्वपनम् ७ । इति शब्दरत्नावली ॥ यथाकाले सेवितनिद्रागुणाः । धातुसाम्यत्वम् । अतन्द्रितत्वम् । पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च ॥ * ॥ दिवास्वप्नगुणाः । स्निग्धत्वम् । तृट्शूलहिक्काजीर्णातिसारिणां हितत्वञ्च ॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्रावशाद्दोलायमानस्य गुणः । अरूक्षत्वम् । अनभिष्यन्दित्वञ्च ॥ * ॥ निद्रासात्म्यीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति । इति राजवल्लभः ॥ * ॥
निद्रारहिता यथा,—
"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च ।
परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥" * ॥
सुखसुप्ता यथा,—
"सुखं स्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः ।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः ॥"
इति गारुडे नीतिसारः ॥
("सत्त्वाच्च तम एव स्यात् जाग्रति स्वपते प्रभुः ।
तमसा प्रावृतो देही योग्या च शून्यताङ्गतः ॥
देहं विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता ।
नासार्द्धे च भ्रुवोर्म्मध्ये लीयते चान्तरात्मना ॥
तस्माच्चेतो भवेत्तत्र निद्रायालीयते नृणाम् ॥"
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥
"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च ॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी पराकुर्य्यात् कालरात्रिरिवापरा ॥"
इति वाभटे सूत्रस्थाने सप्तमेऽध्याये ॥
"पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति ॥
निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति ॥ तत्र यदा संज्ञावहानि स्रोतांसि तमो भूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले । तमोभूयिष्ठानामहःसु निशासु च भवति । रजो भूयिष्ठानामनिमित्तम् । सत्त्वभूयिष्ठानामर्द्धरात्रे । क्षीणश्लेष्मणामनिलबहुलानां मनःशरीराभितापवताञ्च नैव सा वैकारिकी भवति ॥
हृदयञ्चेतनास्थानमुक्तं सुश्रुत ! देहिनाम् ।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम् ॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्तते ॥
पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः ।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते ।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते ॥
सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

निद्राणः, त्रि, (नि + द्रा + क्तः । "संयोगादेरातो धातोर्यण्वतः ।" ८ । २ । ४३ । इति तस्य नः ।) निद्रागतः । तत्पर्य्यायः । शयितः२ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, आर्य्यासप्तशत्याम् ।५२६।
"विहितविविधानुबन्धो मानोन्नतयावधीरितो मानी ।
लभते कुतः प्रबोधं स जागरित्वेव निद्राणः ॥")

निद्रालुः, त्रि, (निद्रातीति । नि + द्रा + "स्पृहिगृहीति ।" ३ । २ । १५८ । इति आलुच् ।) निद्राशीलः । निद्रा विद्यते अस्य शीलार्थेत्यादिना आलुः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । स्वप्नक् २ शयालुः ३ । इत्यमरः । ३ । १ । ३३ ॥ तन्द्रालुः ४ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । ५ । ४१ ।
"काशी विवर्ज्जयेच्चौर्य्यं निद्रालुश्चर्म्मचौरिकाम् ।
जिह्वालौल्यञ्च रोगाढ्यो जीवितं योऽत्र वाञ्छति ॥")

निद्रालुः, स्त्री, (निद्रा द्वैयत्नेनास्त्यस्या इति । निद्रा + बाहुलकात् आलुः ।) वार्त्ताकी । वनवर्व्वरिका । इति राजनिर्घण्टः ॥ नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

निद्रावृक्षः, पुं, (निद्राया वृक्ष इव ।) अन्धकारः । इति शब्दमाला ॥

निद्रासंजननं, क्ली, (निद्रां संजनयतीति । सं + जन + णिच् + ल्युः ।) श्लेष्मा । इति शब्दमाला ॥

निधनं, क्ली, (नि + धा + "कृपृवृजिमन्दिनि धाञः क्युः ।" उणां । २ । ८१ । इति क्युः ।) नाशः । तत् तु अदर्शनं मरणञ्च । (यथा, विष्णुपुराणे । १ । १३ । ७३ ।
"एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥")
कुलम् । तत्तु कुलस्थानं कुलमुख्यञ्च । इत्यमरभरतौ ॥

निधनः, पुं क्ली, (नि + धा + क्युः ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ वधतारा । सा तु जन्मनक्षत्रात् सप्तमी तारा । यथा, जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वध इत्यादि । प्रत्यरौ लवणं दद्यान्निधने तिलकाञ्चनम् । इति ज्योतिस्तत्त्वम् ॥ (निवृत्तं धनं यस्य ।) धनहीने, त्रि ॥

निधानं, क्ली, (निधीयतेऽत्रेति । नि + धा + आधारे ल्युट् ।) निधिः । इति हेमचन्द्रः । २ । १०६ ॥ (यथा, पञ्चतन्त्रे । २ । १६४ ।
"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥")
आधारः । यथा,—